# संस्कृतवार्ता:

दिनाङ्क : 28/12/2024 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ता:

- पूर्व-प्रधानमन्त्रिण: डॉ. मनमोहनसिंहस्य अंतिम-संस्कार: दिल्ल्या: निगम-बोध-घाटे पूर्ण-राजकीय-सम्मानेन सम्पन्न:।
- राष्ट्रपतिना, उपराष्ट्रपतिना-प्रधानमन्त्रिणा, अन्य – गणमान्य-जनै: विभिन्न-राजनीतिक-नेतृभि: च डॉ. सिंहाय श्रद्धाञ्जलि: समर्पिता।
- गृहमन्त्रालयेन प्रतिपादिनं यत् केन्द्र प्रशासनं डॉ. मनमोहन-सिंहस्य स्मारकाय स्थानावण्टनं करिष्यति।
- महाराष्ट्रस्य पालघरे-रेल-स्थात्रं निकषा रेलयानेन संघट्टनात् जनौ मृतौ।
- ऋतुविभागेनाद्य मध्य-प्रदेशे-झञ्झावात:, ओलावृष्टे: अनुमान: अभिव्यक्त:।

-----------------------------------------

डॉ. मनमोहनसिंह:

पूर्व-प्रधानमन्त्रिण: डॉ. मनमोहनसिंहाय नवदिल्ल्यां निगम-बोध-घाट-स्थले पूर्ण-राजकीय-सम्मानेन श्रद्धाञ्जलि: समर्पिता। सिख-ग्रन्थिभि:, डॉ. मनमोहन-सिंहस्य परिजनैश्च अन्तिम-संस्कारात् प्राक् गुरबानी-पाठं कृतवन्त:। औपचारिक-सम्मानानन्तरं राष्ट्रपतिना द्रौपदी मुर्मु, उप-राष्ट्रपतिना जगदीप धनखड़ेन, प्रधानमन्त्रिणा नरेन्द्र मोदिना, केन्द्रीय-मन्त्रिणा राजनाथ-सिंहेन, अमितशाहेन, जगतप्रकाश-नड्डा, लोकसभाध्यक्षेण ओम-बिड़ला वर्येण डॉ. सिंहाय श्रद्धाकुसुमानि समर्पितानि। एतदतिरिच्य कांग्रेस अध्यक्षेण मल्लिकार्जुन खरगे, सोनिया गान्धिनं, राहुल गान्धिनं समेत्य कांग्रेस-दलीय नेतृभि: तस्मै श्रद्धाञ्जलि: अर्पिता। अस्मदीय वार्ताहिरेण निगदितं यत् थलसेना प्रमुखेण जनरल-उपेन्द्र

द्विवेदी-नौसेना प्रमुखेण अमरप्रीत-सिंह, भूटान-नरेशेन जिग्मे-खेसर-नामग्याल-वांगचुक, मॉरीशस-विदेश-मन्त्रिणा धनंजय-रामफलेनापि डॉ. सिंहाय श्रद्धाञ्जलिः समर्पिता।

पूर्व-प्रधानमन्त्रिणः मनमोहन-सिंहस्य बृहस्पतिवासरं नवदिल्ल्यां निधनं जातम्। असौ द्विनवतिः वर्षीयः आसीत्, अथ दीर्घ-समयात् च रूग्णः आसीत्।

----------------------------------------

<u>गृहमन्त्रालयः-स्मारकः</u>

गृहमन्त्रालयेन प्रतिपादितं यत् प्रशासनं पूर्व-प्रधानमन्त्रिणः डॉ. मनमोहन-सिंहाय स्मारकं विनिर्मातुं भूमिः आवंटयिष्यति। एकस्मिन् वक्तव्ये मन्त्रालयेनोक्तं यत् प्रशासनं ह्यः प्रकरणेऽस्मिन् कांग्रेस-अध्यक्ष-मल्लिकार्जुन खरगे पक्षतः अनुरोधः अधिगतः। मन्त्रालयेन प्रकाशितं यत् केन्द्रीय-मन्त्रिमण्डलस्य उपवेशानन्तरं गृहमन्त्रिणा अमित-शाहेन, श्री खरगेण च डॉ. मनमोहनसिंहस्य परिवारं एतदर्थं सूचितम्।

----------------------------------------

<u>भाजपा त्रिवेदी-स्मारकः</u>

भाजपेति दलस्य सांसदः प्रवक्ता च सुधांशु त्रिवेदी उक्तवान् यत् प्रधानमन्त्रिणः नरेन्द्र मोदिनः नेतृत्वस्य भाजपा-एनडीए संयुतेः सर्वकारः देशस्य आर्थिक विकासस्य आधारशिलां संस्थापकं पूर्वप्रधानमन्त्रिणं मनमोहनसिंहम् उचित सम्मानं प्रदानाय पूर्णतया प्रतिबद्धः अस्ति। डॉ. सिंहस्य स्मारक-स्थलाय स्थानाबन्टनस्य प्रकरणे श्रीत्रिवेदिना उक्तं यत् केन्द्रिय मन्त्रिमण्डलेन ह्यः जाते उपवेशने निर्णयः कृतः यत् पूर्वप्रधानमन्त्रिणः स्मृतौ एकस्य स्मारकस्य निर्माणं भविष्यति, सूचनैषा कांग्रेसदलाय अपि प्रदत्तास्ति।

----------------------------------------

<u>पालघर-रेलदुर्घटना:</u>

महाराष्ट्रे गत-रात्रौ पालघर-रेल स्थात्रं निकषा रेलयानेन संघट्टानात् जनद्वयं मृतम्। एकः अन्यश्च गंभीर-रूपेण व्रणितो जातः । त्रयः एव जनाः यदा रेल-यात्रापथं पारितुमुद्यताः आसन्, तदौ एव जयपुर-सुपर-फास्ट-एक्सप्रेस-रेलयानं पट्टिकोपरि समागतम्। मृतकौ जनौ भ्रातारौ आस्ताम्। तृतीयः जनः उपचाराधीनो वर्तते।

----------------------------------------

<u>ऋतुविभागः</u>

भारतीय-ऋतु-विज्ञान-विभागेन मध्य-प्रदेशे ओला-वृष्टिः अनुमानः अभिव्यक्तः। पञ्जाब-हरियाणा-चण्डीगढ़, उत्तर प्रदेश-राजस्थाने च वृष्टेः सम्भावना प्रकटिता। ऋतुविभागेन विदर्भ-महाराष्ट्र-गुजरात-सदृशेषु क्षेत्रेषु यथावत् स्थितिः अनुमानिता। राजस्थान-हिमाचल-प्रदेश-पञ्जाब-हरियाणा-चण्डीगढ़-उत्तर प्रदेशे च आगामि दिवसेषु भीषण-कुञ्झटिका अनुमानिता।

----------------------------------------

<u>हिमाचल प्रदेश-ऋतुविज्ञानः</u>

हिमाचल-प्रदेशे बहुषु-क्षेत्रेषु विगत चतुर्विंशति होरासु हिमपात:, वृष्टि: च सञ्जायते। किन्नौर-जनपदस्य लोकप्रिय-पर्यटन-स्थले चितकुले बृहन्मात्रिक हिमपात: सञ्जात:। लाहौल-स्पीति-इत्यस्य क्षेत्रस्य उच्चतम-पर्वतीय-स्थलेषु भीषण-हिमपात: जात:। एतदतिरिच्य, चम्बा-जनपदस्य जनजातीय-क्षेत्रयो: पांगी, भरमौर इत्येतयो: भीषण-हिमपात: आकलित:। प्रशासनेन जनै: अनावश्यक-यात्रा नैव करणाय अध्यर्थिता:। अखिल उत्तर-भारते शीतलहर्य्या: प्रभाव: दरीदृश्यते। उत्तराखण्डस्य पर्वतीय-क्षेत्रेषु बहुषु-स्थानेषु हिमपात: सूचित:। अस्मदीय-वार्ताहरेण सूचित: यत् अत्यधिक-उच्चतम-पर्वतीयक्षेत्रेषु भीषण-हिमपात: सञ्जात:।

-----------------------------------------

राष्ट्रिय-महिला-आयोग:

राष्ट्रिय-महिला-आयोगस्य अध्यक्षया विजया रहाटकरया चईई-नगर अन्ना-श्विविद्यालय कथित-यौनोत्पीड़न-घटनाया: अन्वीक्षणाय समितिरेका संरचिता। आयोगस्य एकस्मिन् वक्तव्ये सूचितं यत् द्वि-सदस्यतात्मीकाया: समित्या: अस्या: संरचनं परिस्थिनां अन्वीक्षणाय सञ्जातम्। समितिरियं प्रकरणऽस्मिन् सम्बद्ध-अधिकारिभि:, पीडिता, पारिवारिक-जना, मित्रा, प्रशासनस्याधिकारिभिस्साकं विचार-विमर्शोऽपिविधास्यति।

-----------------------------------------

प्रधानमन्त्री -मन की बात कार्यक्रमः

प्रधानमन्त्री नरेन्द्रमोदी अस्य मासस्य एकोनत्रिंशद्दिनाङ्के श्वः आकाशवाण्या: 'मन की बात' तियस्मिन् कार्यक्रम जनस्सह स्वविचारान् विनिमयी-करिष्यति। दं मासिक-रेडियो-कार्यक्रमस्य सप्तदशाधिक- कशततमं संस्करणं भविष्यति। कार्यक्रमस्य प्रसारणम् आकाशवाण्यां, दूरदर्शन, AIR News वेबफलक, Newsonair ति दूरभाष-तन्त्रांश च भविष्यति। अयं कार्यक्रमः आकाशवाणी-दूरदर्शन-प्रधानमन्त्री-कार्यालय-सूचनाप्रसारण-मन्त्रालयानां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यत हिन्दी- प्रसारणानन्तरं क्षत्रीयभाषासु च अस्य कार्यक्रमस्य प्रसारणं भविष्यति।

-----------------------------------------

सैन्य-सूर्यकिरण:

भारतीय-सैन्य-दलमद्य अष्टमीय बटालियन-स्तरीय संयुक्त-सैन्य-अभ्यास सूर्य-किरण ति नामधेय भागं गृहीतुं प्रस्थितम्। दलऽस्मिन् चतुस्त्रिंशदुत्तर त्रिशत-सनिका: समाविष्टा: सन्ति। अभ्यासस्यास्य आयोजनं नेपालस्य सलझंडी-नगर दिसम्बर मासस्य अन्तिम-दिवसादारभ्य आगामि-मास जनवरी त्रयोदश दिनाङ्कं यावत् प्रचलिष्याति। रक्षा-मन्त्रालयस्य वक्तव्य एकस्मिन् प्रतिपादितं यत् अभ्यासोऽयं वन-क्षत्र-पर्वतेषु आतंकरोधि गतिविधय: अपाकर्तुं पूर्ण-प्रतिबद्ध: भविष्यति। मन्त्रालयेनोक्तं यत् अभ्यास: अयं भारत-नेपालयोर्मध्य मित्रता-विश्वास-सांस्कृतिक-सम्बन्धा: च दृढ़यिष्याति।

-----------------------------------------

कृष्णाङ्गार उत्पादनम्

भारतेन त्रयोविंशत्यधिक द्विसहस्र-चतुर्विंशत्यधिक द्विसहस्रतम वर्षयोः अधुनापर्यन्तं सर्वाधिकं कृष्णाङ्गारोत्पादनं दृष्टम्। त्रयोविंशत्यधिक द्विसहस्र-चतुर्विंशत्यधिक द्विसहस्रतम वर्षयोः अखिले हि भारते कृष्णाङ्गारस्य उत्पादनं सप्तनवत्यधिक नवशत दशमलव षड्विंशत्यधिक अष्टशतं मिलियन टन परिमितम् आसीत्, तत्रैव विगतवर्षे त्रिणवत्यधिक अष्टशत दशमलव एक नवत्यधिकैक शतं मिलियन टन परिमितम् आसीत् यस्मिन् प्रायः एकादश दशमलव एकसप्ततिः प्रतिशतं यावत् वृद्धिः जाता। कृष्णाङ्गारमन्त्रालयेन सूचितं यत् देशेन अस्य मासस्य पञ्चदश दिनाङ्कपर्यन्तं देशे प्रायः त्रिषष्ट्युत्तर नवशत दशमलव एकादश मेट्रिकटन परिमितं यावत् कृष्णाङ्गारस्य आपूर्तिः कृता अस्ति।

-----------------------------------------

<u>क्रिकेट्</u>

मेलबर्न नगरे ऑस्ट्रेलिया-देशेन साकं "बॉर्डर-गावस्कर-ट्रॉफी" इत्यस्य चतुर्थ-क्रिकेट-अभ्यास-स्पर्धायाः तृतीय-दिवसे भारतदेशेन अष्टपञ्चाशदुत्तर-त्रिशत-धावनाङ्काः समर्जिताः। अद्य प्रातः भारतेन स्वीय-प्रथम-पाल्यां चतुषष्टि-उत्तर-शताः अंकाः अर्जिताः। पञ्च-स्पर्धात्मिकायां स्पर्धायामेतस्यां उभौ देशौ समान-अंके वर्तेते।

-----------------------------------------

<u>संस्कृत-साप्ताहिकी</u>

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्ध□विभिन्न□क्रियाकलाप□संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः श्वः रविवासरे मध्याह्ने सार्धैक-वादनतः भविष्यति। कृपया श्रृण्वन्तु।

इति वार्ता।